# ॥ કાકિન્યષ્ટોત્તરસહસ્રનામસ્તોત્ર ॥

.. kAkinyaShTottarasahasranAmastotra ..

sanskritdocuments.org

August 2, 2016

# .. kAkinyaShTottarasahasranAmastotra ..

# ॥ કાકિન્યષ્ટોત્તરસહસ્રનામસ્તોત્ર ॥

## Document Information

Text title : kAkinI aShTottarasahasranAmastotra

File name : kAkinIshvarasahasra.itx

Category : sahasranAma

Location : doc_devii

Author : Traditional

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Mark S.G. Dyczkowski muktAbodha

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : rudrayAmale uttaratantre bhairava bhairavI sa.nvAde

Latest update : May 25, 2009

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

sanskritdocuments.org

# ॥ કાકિન્યષ્ટોત્તરસહસ્રનામસ્તોત્ર ॥

શ્રીગણેશાય નમઃ ।
શ્રીઆનન્દભૈરવ ઉવાચ ।
વદ કલ્યાણિ કામેશિ ત્રૈલોક્યપરિપૂજિતે ।
બ્રહ્માણ્ડાનન્તનિલયે કૈલાસશિખરોજ્જ્વલે ॥ ૧ ॥

કાલિકે કાલરાત્રિસ્થે મહાકાલનિષેવિતે ।
શબ્દબ્રહ્મસ્વરૂપે ત્વં વક્તુમર્હસિ સાદરાત્ ॥ ૨ ॥

સહસ્રનામયોગાખ્યમ્ અષ્ટોત્તરમનન્તરમ્ ।
અનન્તકોટિબ્રહ્માણ્ડં સારં પરમમઙ્ગલમ્ ॥ ૩ ॥

જ્ઞાનસિદ્ધિકરં સાક્ષાદ્ અત્યન્તાનન્દવર્ધનમ્ ।
સઙ્કેતશબ્દમોક્ષાર્થં કાકિનીશ્વરસંયુતમ્ ॥ ૪ ॥

પરાનન્દકરં બ્રહ્મ નિર્વાણપદલાલિતમ્ ।
સ્નેહાદભિસુખાનન્દાદાદૌ બ્રહ્મ વરાનને ॥ ૫ ॥

ઇચ્છામિ સર્વદા માતર્જગતાં સુરસુન્દરિ ।
સ્નેહાનન્દરસોદ્રેકસમ્બન્ધાન્ કથય દ્રુતમ્ ॥ ૬ ॥

શ્રીઆનન્દભૈરવી ઉવાચ
ઈશ્વર શ્રીનીલકણ્ઠ નાગમાલાવિભૂષિતઃ ।
નાગેન્દ્રચિત્રમાલાઢ્ય નાગાધિપરમેશ્વરઃ ॥ ૭ ॥

કાકિનીશ્વરયોગાઢ્યં સહસ્રનામ મઙ્ગલમ્ ।
અષ્ટોત્તરં વૃતાકારં કોટિસૌદામિનીપ્રભમ્ ॥ ૮ ॥

આયુરારોગ્યજનનં શૃણુષ્વાવહિતો મમ ।
અનન્તકોટિબ્રહ્માણ્ડસારં નિત્યં પરાત્પરમ્ ॥ ૯ ॥

સાધનં બ્રહ્મણો જ્ઞાનં યોગાનાં યોગસાધનમ્ ।
સાર્વજ્ઞગુહ્યસંસ્કારં સંસ્કારાદિફલપ્રદમ્ ॥ ૧૦ ॥

વાઞ્છાસિદ્ધિકરં સાક્ષાન્મહાપાતકનાશનમ્ ।
મહાદારિદ્ર્યશમનં મહૈશ્વર્યપ્રદાયકમ્ ॥ ૧૧ ॥

જપેદ્યઃ પ્રાતરિ પ્રીતો મધ્યાહ્નેઽસ્તમિતે રવૌ ।
નમસ્કૃત્ય જપેન્નામ ધ્યાનયોગપરાયણઃ ॥ ૧૨ ॥

કાકિનીશ્વરસંયોગં ધ્યાનં ધ્યાનગુણોદયમ્ ।
આદૌ ધ્યાનં સમાચર્ય નિર્મલોઽમલચેતસા ॥ ૧૩ ॥

ધ્યાયેદ્ દેવીં મહાકાલીં કાકિનીં કાલરૂપિણીમ્ ।
પરાનન્દરસોન્મત્તાં શ્યામાં કામદુઘાં પરામ્ ॥ ૧૪ ॥

ચતુર્ભુજાં ખડ્ગચર્મવરપદ્મધરાં હરામ્ ।
શત્રુક્ષયકરીં રત્નાઽલઙ્કારકોટિમણ્ડિતામ્ ॥ ૧૫ ॥

તરુણાનન્દરસિકાં પીતવસ્ત્રાં મનોરમામ્ ।
કેયૂરહારલલિતાં તાટઙ્કદ્વયશોભિતામ્ ॥ ૧૬ ॥

ઈશ્વરીં કામરત્નાખ્યાં કાકચઞ્ચુપુટાનનામ્ ।
સુન્દરીં વનમાલાઢ્યાં ચારુસિંહાસનસ્થિતામ્ ॥ ૧૭ ॥

હૃત્પદ્મકર્ણિકામધ્યાકાશસૌદામિનીપ્રભામ્ ।
એવં ધ્યાત્વા પઠેન્નામમઙ્ગલાનિ પુનઃ પુનઃ ॥ ૧૮ ॥

ઈશ્વરં કોટિસૂર્યાભં ધ્યાયેદ્ધૃદયમણ્ડલે ।
ચતુર્ભુજં વીરરૂપં લાવણ્યં ભાવસમ્ભવમ્ ॥ ૧૯ ॥

શ્યામં હિરણ્યભૂષાઙ્ગં ચન્દ્રકોટિસુશીતલમ્ ।
અભયં વરદં પદ્મં મહાખડ્ગધરં વિભુમ્ ॥ ૨૦ ॥

કિરીટિનં મહાકાયં સ્મિતહાસ્યં પ્રકાશકમ્ ।
હૃદયામ્બુજમધ્યસ્થં નૂપુરૈરુપશોભિતમ્ ॥ ૨૧ ॥

કોટિકાલાનલં દીપ્તં કાકિનીદક્ષિણસ્થિતમ્ ।
એવં વિચિન્ત્ય મનસા યોગિનં પરમેશ્વરમ્ ॥ ૨૨ ॥

તતઃ પઠેત્ સહસ્રાખ્યં વદામિ શૃણુ તત્પ્રભો ॥ ૨૩ ॥

અસ્ય શ્રીકાકિનીશ્વરસહસ્રનામસ્તોત્રસ્ય બ્રહ્માઋષિ ,
ગાયત્રીચ્છન્દઃ , જગદીશ્વર કાકિની દેવતા ,
નિર્વાણયોગાર્થ સિદ્ધ્યર્થે જપે વિનિયોગઃ ।
ૐ ઈશ્વરઃ કાકિનીશાન ઈશાન કમલેશ્વરી ।
ઈશઃ કાકેશ્વરીશાની ઈશ્વરીશઃ કુલેશ્વરી ॥ ૨૪ ॥

ઈશમોક્ષઃ કામધેનુઃ કપર્દીશઃ કપર્દિની ।
કૌલઃ કુલીનાન્તરગા કવિઃ કાવ્યપ્રકાશિની ॥ ૨૫ ॥

કલાદેશઃ સુકવિતા કારણઃ કરુણામયી ।
કઞ્જપત્રેક્ષણઃ કાલી કામઃ કોલાવલીશ્વરી ॥ ૨૬ ॥

કિરાતરૂપી કૈવલ્યા કિરણઃ કામનાશના ।

કાર્ણાટેશઃ સકર્ણાટી કલિકઃ કાલિકાપુટા ॥ ૨૭ ॥

કિશોરઃ કીશુનમિતા કેશવેશઃ કુલેશ્વરી ।
કેશકિઞ્જલ્કકુટિલઃ કામરાજકુતૂહલા ॥ ૨૮ ॥

કરકોટિધરઃ કૂટા ક્રિયાક્રૂરઃ ક્રિયાવતી ।
કુમ્ભહા કુમ્ભહન્ત્રી ચ કટકચ્છકલાવતી ॥ ૨૯ ॥

કઞ્જવક્ત્રઃ કાલમુખી કોટિસૂર્યકરાનના ।
કમ્રઃ કલપઃ સમૃદ્ધિસ્થા કુપોઽન્તસ્થઃ કુલાચલા ॥ ૩૦ ॥

કુણપઃ કૌલપાકાશા સ્વકાન્તઃ કામવાસિની ।
સુકૃતિઃ શાઙ્કરી વિદ્યા કલકઃ કલનાશ્રયા ॥ ૩૧ ॥

કર્કન્ધુસ્થઃ કૌલકન્યા કુલીનઃ કન્યકાકુલા ।
કુમારઃ કેશરી વિદ્યા કામહા કુલપણ્ડિતા ॥ ૩૨ ॥

કલ્કીશઃ કમનીયાઙ્ગી કુશલઃ કુશલાવતી ।
કેતકીપુષ્પમાલાઢ્યઃ કેતકીકુસુમાન્વિતા ॥ ૩૩ ॥

કુસુમાનન્દમાલાઢ્યઃ કુસુમામલમાલિકા ।
કવીન્દ્રઃ કાવ્યસમ્ભૂતઃ કામમઞ્જીરરઞ્જિની ॥ ૩૪ ॥

કુશાસનસ્થઃ કૌશલ્યાકુલપઃ કલ્પપાદપા ।
કલ્પવૃક્ષઃ કલ્પલતા વિકલ્પઃ કલ્પગામિની ॥ ૩૫ ॥

કઠોરસ્થઃ કાચનિભા કરાલઃ કાલવાસિની ।
કાલકૂટાશ્રયાનન્દઃ કર્કશાકાશવાહિની ॥ ૩૬ ॥

કટધૂમાકૃતિચ્છાયો વિકટાસનસંસ્થિતા ।
કાયધારી કૂપકરી કરવીરાગતઃ કૃષી ॥ ૩૭ ॥

કાલગમ્ભીરનાદાન્તા વિકલાલાપમાનસા ।
પ્રકૃતીશઃ સત્પ્રકૃતિઃ પ્રકૃષ્ટઃ કર્ષિણીશ્વરી ॥ ૩૮ ॥

ભગવાન્ વારુણીવર્ણા વિવર્ણો વર્ણરૂપિણી ।
સુવર્ણવર્ણો હેમાભો મહાન્ મહેન્દ્રપૂજિતા ॥ ૩૯ ॥

મહાત્મા મહતીશાની મહેશો મત્તગામિની ।
મહાવીરો મહાવેગા મહાલક્ષ્મીશ્વરો મતિઃ ॥ ૪૦ ॥

મહાદેવો મહાદેવી મહાનન્દો મહાકલા ।
મહાકાલો મહાકાલી મહાબલો મહાબલા ॥ ૪૧ ॥

મહામાન્યો મહામાન્યા મહાધન્યો મહાધની ।

મહામાલો મહામાલા મહાકાશો મહાકાશા ॥ ૪૨ ॥

મહાયશો મહાયજ્ઞા મહારાજો મહારજા ।
મહાવિદ્યો મહાવિદ્યા મહામુખ્યો મહામખી ॥ ૪૩ ॥

મહારાત્રો મહારાત્રિર્મહાધીરો મહાશયા ।
મહાક્ષેત્રો મહાક્ષેત્રા કુરુક્ષેત્રઃ કુરુપ્રિયા ॥ ૪૪ ॥

મહાચણ્ડો મહોગ્રા ચ મહામત્તો મહામતિઃ ।
મહાવેદો મહાવેદા મહોત્સાહો મહોત્સવા ॥ ૪૫ ॥

મહાકલ્પો મહાકલ્પા મહાયોગો મહાગતિઃ ।
મહાભદ્રો મહાભદ્રા મહાસૂક્ષ્મો મહાચલા ॥ ૪૬ ॥

મહાવાક્યો મહાવાણી મહાયજ્વા મહાજવા ।
મહામૂર્તીર્મહાકાન્તા મહાધર્મો મહાધના ॥ ૪૭ ॥

મહામહોગ્રો મહિષી મહાભોગ્યો મહાપ્રભા ।
મહાક્ષેમો મહામાયા મહામાયા મહારમા ॥ ૪૮ ॥

મહેન્દ્રપૂજિતા માતા વિભાલો મણ્ડલેશ્વરી ।
મહાવિકાલો વિકલા પ્રતલસ્થલલામગા ॥ ૪૯ ॥

કૈવલ્યદાતા કૈવલ્યા કૌતુકસ્થો વિકર્ષિણી ।
વાલાપ્રતિર્વાલપત્ની બલરામો વલાઞ્જા ॥ ૫૦ ॥

અવલેશઃ કામવીરા પ્રાણેશઃ પ્રાણરક્ષિણી ।
પઞ્ચમાચારગઃ પઞ્ચાપઞ્ચમઃ પઞ્ચમીશ્વરી ॥ ૫૧ ॥

પ્રપઞ્ચઃ પઞ્ચરસગા નિષ્પ્રપઞ્ચઃ કૃપામયી ।
કામરૂપી કામરૂપા કામક્રોધવિવર્જિતા ॥ ૫૨ ॥

કામાત્મા કામનિલયા કામાખ્યા કામચઞ્ચલા ।
કામપુષ્પધરઃ કામા કામેશઃ કામપુષ્પિણી ॥ ૫૩ ॥

મહામુદ્રાધરો મુદ્રા સન્મુદ્રઃ કામમુદ્રિકા ।
ચન્દ્રાર્ધકૃતભાલાભો વિધુકોટિમુખામ્બુજા ॥ ૫૪ ॥

ચન્દ્રકોટિપ્રભાધારી ચન્દ્રજ્યોતિઃસ્વરૂપિણી ।
સૂર્યાભો વીરકિરણા સૂર્યકોટિવિભાવિતા ॥ ૫૫ ॥

મિહિરેશો માનવકા અન્તર્ગ્ગામી નિરાશ્રયા ।
પ્રજાપતીશઃ કલ્યાણી દક્ષેશઃ કુલરોહિણી ॥ ૫૬ ॥

અપ્રચેતાઃ પ્રચેતસ્થા વ્યાસેશો વ્યાસપૂજિતા ।

કાશ્યપેશઃ કાશ્યપેશી ભૃગ્વીશો ભાર્ગવેશ્વરી ॥ ૫૭ ॥

વશિષ્ઠઃ પ્રિયભાવસ્થો વશિષ્ઠબાધિતાપરા ।
પુલસ્ત્યપૂજિતો દેવઃ પુલસ્ત્યચિત્તસંસ્થિતા ॥ ૫૮ ॥

અગસ્ત્યાર્ચ્યોઽગસ્ત્યમાતા પ્રહ્લાદેશો વલીશ્વરી ।
કર્દમેશઃ કર્દમાદ્યા બાલકો બાલપૂજિતા ॥ ૫૯ ॥

મનસ્થશ્ચાન્તરિક્ષસ્થા શબ્દજ્ઞાની સરસ્વતી ।
રૂપાતીતા રૂપશૂન્યા વિરૂપો રૂપમોહિની ॥ ૬૦ ॥

વિદ્યાધરેશો વિદ્યેશી વૃષસ્થો વૃષવાહિની ।
રસજ્ઞો રસિકાનન્દા વિરસો રસવર્જિતા ॥ ૬૧ ॥

સૌનઃ સનત્કુમારેશી યોગચર્યેશ્વરઃ પ્રિયા ।
દુર્વાશાઃ પ્રાણનિલયઃ સાઙ્ખ્યયોગસમુદ્ભવા ॥ ૬૨ ॥

અસઙ્ખ્યેયો માંસભક્ષા સુમાંસાશી મનોરમા ।
નરમાંસવિભોક્તા ચ નરમાંસવિનોદિની ॥ ૬૩ ॥

મીનવક્ત્રપ્રિયો મીના મીનભુઙ્મીનભક્ષિણી ।
રોહિતાશી મત્સ્યગન્ધા મત્સ્યનાથો રસાપહા ॥ ૬૪ ॥

પાર્વતીપ્રેમનિકરો વિધિદેવાધિપૂજિતા ।
વિધાતૃવરદો વેદ્યા વેદો વેદકુમારિકા ॥ ૬૫ ॥

શ્યામેશો સિતવર્ણા ચ ચાસિતોઽસિતરૂપિણી ।
મહામત્તાઽઽસવાશી ચ મહામત્તાઽઽસવપ્રિયા ॥ ૬૬ ॥

આસવાઢ્યોઽમનાદેવી નિર્મલાસવપામરા ।
વિસત્તો મદિરામત્તા મત્તકુઞ્જરગામિની ॥ ૬૭ ॥

મણિમાલાધરો માલામાતૃકેશઃ પ્રસન્નધીઃ ।
જરામૃત્યુહરો ગૌરી ગાયનસ્થો જરામરા ॥ ૬૮ ॥

સુચઞ્ચલોઽતિદુર્ધર્ષા કણ્ઠસ્થો હૃદ્ગતા સતી ।
અશોકઃ શોકરહિતા મન્દરસ્થો હિ મન્ત્રિણી ॥ ૬૯ ॥

મન્ત્રમાલાધરાનન્દો મન્ત્રયન્ત્રપ્રકાશિની ।
મન્ત્રાર્થચૈતન્યકરો મન્ત્રસિદ્ધિપ્રકાશિની ॥ ૭૦ ॥

મન્ત્રજ્ઞો મન્ત્રનિલયા મન્ત્રાર્થામન્ત્રમન્ત્રિણી ।
બીજધ્યાનસમન્તસ્થા મન્ત્રમાલેઽતિસિદ્ધિદા ॥ ૭૧ ॥

મન્ત્રવેત્તા મન્ત્રસિદ્ધિર્મન્ત્રસ્થો માન્ત્રિકાન્તરા ।

બીજસ્વરૂપો બીજેશી બીજમાલેઽતિ બીજિકા ॥ ૭૨ ॥

બીજાત્મા બીજનિલયા બીજાઢ્યા બીજમાલિની ।
બીજધ્યાનો બીજયજ્ઞા બીજાઢ્યા બીજમાલિની ॥ ૭૩ ॥

મહાબીજધરો બીજા બીજાઢ્યા બીજવલ્લભા ।
મેઘમાલા મેઘમાલો વનમાલી હલાયુધા ॥ ૭૪ ॥

કૃષ્ણાજિનધરો રૌદ્રા રૌદ્રી રૌદ્રગણાશ્રયા ।
રૌદ્રપ્રિયો રૌદ્રકર્ત્રી રૌદ્રલોકપ્રદઃ પ્રભા ॥ ૭૫ ॥

વિનાશી સર્વગાનાં ચ સર્વાણી સર્વસમ્પદા ।
નારદેશઃ પ્રધાનેશી વારણેશો વનેશ્વરી ॥ ૭૬ ॥

કૃષ્ણેશ્વરઃ કેશવેશી કૃષ્ણવર્ણસ્ત્રિલોચના ।
કામેશ્વરો રાઘવેશી બાલેશી વા બાણપૂજિતઃ ॥ ૭૭ ॥

ભવાનીશો ભવાની ચ ભવેન્દ્રો ભવવલ્લભા ।
ભવાનન્દોઽતિસૂક્ષ્માખ્યા ભવમૂતીર્ભવેશ્વરી ॥ ૭૮ ॥

ભવચ્છાયો ભવાનન્દો ભવભીતિહરો વલા ।
ભાષાજ્ઞાનીભાષમાલા મહાજીવોઽતિવાસના ॥ ૭૯ ॥

લોભાપદો લોભકર્ત્રી પ્રલોભો લોભવર્ધિની ।
મોહાતીતો મોહમાતા મોહજાલો મહાવતી ॥ ૮૦ ॥

મોહમુદ્ગરધારી ચ મોહમુદ્ગરધારિણી ।
મોહાન્વિતો મોહમુગ્ધા કામેશઃ કામિનીશ્વરી ॥ ૮૧ ॥

કામલાપકરોઽકામા સત્કામો કામનાશિની ।
બૃહન્મુખો બૃહન્નેત્રા પદ્માભોઽમ્બુજલોચના ॥ ૮૨ ॥

પદ્મમાલઃ પદ્મમાલા શ્રીદેવો દેવરક્ષિણી ।
અસિતોઽપ્યસિતા ચૈવ આહ્લાદો દેવમાતૃકા ॥ ૮૩ ॥

નાગેશ્વરઃ શૈલમાતા નાગેન્દ્રો વૈ નગાત્મજા ।
નારાયણેશ્વરઃ કીર્તિઃ સત્કીર્તિઃ કીર્તિવર્ધિની ॥ ૮૪ ॥

કાર્તિકેશઃ કાર્તિકી ચ વિકર્તા ગહનાશ્રયા ।
વિરક્તો ગરુડારૂઢા ગરુડસ્થો હિ ગારુડી ॥ ૮૫ ॥

ગરુડેશો ગુરુમયી ગુરુદેવો ગુરુપ્રદા ।
ગૌરાઙ્ગેશો ગૌરકન્યા ગઙ્ગેશઃ પ્રાઙ્ગણેશ્વરી ॥ ૮૬ ॥

પ્રતિકેશો વિશાલા ચ નિરાલોકો નિરીન્દ્રિયા ।
પ્રેતબીજસ્વરૂપશ્ચ પ્રેતાઽલઙ્કારભૂષિતા ॥ ૮૭ ॥

પ્રેમગેહઃ પ્રેમહન્ત્રી હરીન્દ્રો હરિણેક્ષણા ।
કાલેશઃ કાલિકેશાની કૌલિકેશશ્ચ કાકિની ॥ ૮૮ ॥

કાલમઞ્જીરધારી ચ કાલમઞ્જીરમોહિની ।
કરાલવદનઃ કાલી કૈવલ્યદાનદઃ કથા ॥ ૮૯ ॥

કમલાપાલકઃ કુન્તી કૈકેયીશઃ સુતઃ કલા ।
કાલાનલઃ કુલજ્ઞા ચ કુલગામી કુલાશ્રયા ॥ ૯૦ ॥

કુલધર્મસ્થિતઃ કૌલા કુલમાર્ગઃ કુલાતુરા ।
કુલજિહ્વઃ કુલાનન્દા કૃષ્ણઃ કૃષ્ણસમુદ્ભવા ॥ ૯૧ ॥

કૃષ્ણેશઃ કૃષ્ણમહિષી કાકસ્થઃ કાકચઞ્ચુકા ।
કાલધર્મઃ કાલરૂપા કાલઃ કાલપ્રકાશિની ॥ ૯૨ ॥

કાલજઃ કાલકન્યા ચ કાલેશઃ કાલસુન્દરી ।
ખડ્ગહસ્તઃ ખર્પરાઢ્યા ખરગઃ ખરખડ્ગની ॥ ૯૩ ॥

ખલબુદ્ધિહરઃ ખેલા ખઞ્જનેશઃ સુખાઞ્જની ।
ગીતપ્રિયો ગાયનસ્થા ગણપાલો ગૃહાશ્રયા ॥ ૯૪ ॥

ગર્ગપ્રિયો ગયાપ્રાપ્તિર્ગર્ગસ્થો હિ ગભીરિણા ।
ગારુડીશો હિ ગાન્ધર્વી ગતીશો ગાર્હવહ્નિજા ॥ ૯૫ ॥

ગણગન્ધર્વગોપાલો ગણગન્ધર્વગો ગતા ।
ગભીરમાની સમ્ભેદો ગભીરકોટિસાગરા ॥ ૯૬ ॥

ગતિસ્થો ગાણપત્યસ્થા ગણનાદ્યો ગવા તનૂઃ ।
ગન્ધદ્વારો ગન્ધમાલા ગન્ધાઢ્યો ગન્ધનિર્ગમા ॥ ૯૭ ॥

ગન્ધમોહિતસર્વાઙ્ગો ગન્ધચઞ્ચલમોહિની ।
ગન્ધપુષ્પધૂપદીપનૈવેદ્યાદિપ્રપૂજિતા ॥ ૯૮ ॥

ગન્ધાગુરુસુકસ્તૂરી કુઙ્કુમાદિવિમણ્ડિતા ।
ગોકુલા મધુરાનન્દા પુષ્પગન્ધાન્તરસ્થિતા ॥ ૯૯ ॥

ગન્ધમાદનસમ્ભૂતપુષ્પમાલ્યવિભૂષિતઃ ।
રત્નાદ્યશેષાલઙ્કારમાલામણ્ડિતવિગ્રહઃ ॥ ૧૦૦ ॥

સ્વર્ણાદ્યશેષાલઙ્કારહારમાલાવિમણ્ડિતા ।
કરવીરા યુતપ્રખ્યરક્તલોચનપઙ્કજઃ ॥ ૧૦૧ ॥

જવાકોટિકોટિશત ચારુલોચનપઙ્કજા ।
ઘનકોટિમહાનાસ્ય પઙ્કજાલોલવિગ્રહા ॥ ૧૦૨ ॥

ઘર્ઘરધ્વનિમાનન્દકાવ્યામ્બુધિમુખામ્બુજા ।
ઘોરચિત્રસર્પરાજ માલાકોટિશતાઙ્કભૃત્ ॥ ૧૦૩ ॥

ઘનઘોરમહાનાગ ચિત્રમાલાવિભૂષિતા ।
ઘણ્ટાકોટિમહાનાદમાનન્દલોલવિગ્રહઃ ॥ ૧૦૪ ॥

ઘણ્ટાડમરુમન્ત્રાદિ ધ્યાનાનન્દકરામ્બુજા ।
ઘટકોટિકોટિશતસહસ્રમઙ્ગલાસના ॥ ૧૦૫ ॥

ઘણ્ટાશઙ્ખપદ્મચક્રવરાભયકરામ્બુજા ।
ઘાતકો રિપુકોટીનાં શુમ્ભાદીનાં તથા સતામ્ ॥ ૧૦૬ ॥

ઘાતિનીદૈત્યઘોરાશ્ચ શઙ્ખાનાં સતતં તથા ।
ચાર્વાકમતસઙ્ઘાતચતુરાનનપઙ્કજઃ ॥ ૧૦૭ ॥

ચઞ્ચલાનન્દસર્વાર્થસારવાગ્વાદિનીશ્વરી ।
ચન્દ્રકોટિસુનિર્માલ માલાલમ્બિતકણ્ઠભૃત્ ॥ ૧૦૮ ॥

ચન્દ્રકોટિસમાનસ્ય પઙ્કેરુહમનોહરા ।
ચન્દ્રજ્યોત્સ્નાયુતપ્રખ્યહારભૂષિતમસ્તકઃ ॥ ૧૦૯ ॥

ચન્દ્રબિમ્બસહસ્રાભાયુતભૂષિતમસ્તકઃ ।
ચારુચન્દ્રકાન્તમણિમણિહારાયુતાઙ્ગભૃત્ ॥ ૧૧૦ ॥

ચન્દનાગુરુકસ્તૂરી કુઙ્કુમાસક્તમાલિની ।
ચણ્ડમુણ્ડમહામુણ્ડાયુતનિર્મલમાલ્યભૃત્ ॥ ૧૧૧ ॥

ચણ્ડમુણ્ડઘોરમુણ્ડનિર્માણકુલમાલિની ।
ચણ્ડાટ્ટહાસઘોરાઢ્યવદનામ્ભોજચઞ્ચલઃ ॥ ૧૧૨ ॥

ચલત્ખઞ્જનનેત્રામ્ભોરુહમોહિતશઙ્કરા ।
ચલદમ્ભોજનયનાનન્દપુષ્પકરમોહિતઃ ॥ ૧૧૩ ॥

ચલદિન્દુભાષમાણાવગ્રહખેદચન્દ્રિકા ।
ચન્દ્રાર્ધકોટિકિરણચૂડામણ્ડલમણ્ડિતઃ ॥ ૧૧૪ ॥

ચન્દ્રચૂડામ્ભોજમાલા ઉત્તમાઙ્ગવિમણ્ડિતઃ ।
ચલદર્કસહસ્રાન્ત રત્નહારવિભૂષિતઃ ॥ ૧૧૫ ॥

ચલદર્કકોટિશતમુખામ્ભોજતપોજ્જ્વલા ।
ચારુરત્નાસનામ્ભોજચન્દ્રિકામધ્યસંસ્થિતઃ ॥ ૧૧૬ ॥

ચારુદ્વાદશપત્રાદિ કર્ણિકાસુપ્રકાશિકા ।

ચમત્કારગટઙ્કારધુનર્બાણકરામ્બુજઃ ॥ ૧૧૭ ॥

ચતુર્થવેદગાથાદિ સ્તુતિકોટિસુસિદ્ધિદા ।
ચલદમ્બુજનેત્રાર્કવહ્નિચન્દ્રત્રયાન્વિતઃ ॥ ૧૧૮ ॥

ચલત્સહસ્રસઙ્ખ્યાત પઙ્કજાદિપ્રકાશિકા ।
ચમત્કારાટ્ટહાસાસ્ય સ્મિતપઙ્કજરાજયઃ ॥ ૧૧૯ ॥

ચમત્કારમહાઘોરસાટ્ટાટ્ટહાસશોભિતા ।
છાયાસહસ્રસંસારશીતલાનિલશીતલઃ ॥ ૧૨૦ ॥

છદપદ્મપ્રભામાનસિંહાસનસમાસ્થિતા ।
છલત્કોટિદૈત્યરાજમુણ્ડમાલાવિભૂષિતઃ ॥ ૧૨૧ ॥

છિન્નાદિકોટિમન્ત્રાર્થજ્ઞાનચૈતન્યકારિણી ।
ચિત્રમાર્ગમહાધ્વાન્તગ્રન્થિસમ્ભેદકારકઃ ॥ ૧૨૨ ॥

અસ્ત્રકાસ્ત્રાદિબ્રહ્માસ્ત્રસહસ્રકોટિધારિણી ।
અજામાંસાદિસદ્ભક્ષરસામોદપ્રવાહગઃ ॥ ૧૨૩ ॥

છેદનાદિમહોગ્રાસ્ત્રે ભુજવામપ્રકાશિની ।
જયાખ્યાદિમહાસામ જ્ઞાનાર્થસ્ય પ્રકાશકઃ ॥ ૧૨૪ ॥

જાયાગણહૃદમ્ભોજ બુદ્ધિજ્ઞાનપ્રકાશિની ।
જનાર્દનપ્રેમભાવ મહાધનસુખપ્રદઃ ॥ ૧૨૫ ॥

જગદીશકુલાનન્દસિન્ધુપઙ્કજવાસિની ।
જીવનાસ્થાદિજનકઃ પરમાનન્દયોગિનામ્ ॥ ૧૨૬ ॥

જનની યોગશાસ્ત્રાણાં ભક્તાનાં પાદપદ્મયોઃ ।
રુક્ષપવનનિર્વાતમહોલ્કાપાતકારુણઃ ॥ ૧૨૭ ॥

ઝર્ઝરીમધુરી વીણા વેણુશઙ્ખપ્રવાદિની ।
ઝનત્કારૌઘસંહારકરદણ્ડવિશાનધૃક્ ॥ ૧૨૮ ॥

ઝર્ઝરીનાયિકાર્ચ્યાદિકરામ્ભોજનિષેવિતા ।
ટઙ્કારભાવસંહારમહાજાગરવેશધૃક્ ॥ ૧૨૯ ॥

ટઙ્કાસિપાશુપાતાસ્ત્રચર્મકાર્મુકધારિણી ।
ટલનાનલસઙ્ઘટ્ટપટ્ટામ્બરવિભૂષિતઃ ॥ ૧૩૦ ॥

ટુલ્ટુની કિઙ્કિણી કોટિ વિચિત્રધ્વનિગામિની ।
ઠં ઠં ઠં મનુમૂલાન્તઃ સ્વપ્રકાશપ્રબોધકઃ ॥ ૧૩૧ ॥

ઠં ઠં ઠં પ્રખરાહ્લાદનાદસંવાદવાદિની ।

ઠં ઠં ઠં કૂર્મપૃષ્ઠસ્થઃ કામચાકારભાસનઃ ॥ ૧૩૨ ॥

ઠં ઠં ઠં બીજવહ્નિસ્થ હાતુકભૂવિભૂષિતા ।
ડામરપ્રખરાહ્લાદસિદ્ધિવિદ્યાપ્રકાશકઃ ॥ ૧૩૩ ॥

ડિણ્ડિમધ્વાનમધુરવાણીસમ્મુખપઙ્કજા ।
ડં ડં ડં ખરકૃત્યાદિ મારણાન્તઃપ્રકાશિકા ॥ ૧૩૪ ॥

ઢક્કારવાદ્યભૂપૂરતારસપ્તસ્વરાશ્રયઃ ।
ઢૌં ઢૌં ઢૌં ઢૌકઢક્કલં વહ્નિજાયામનુપ્રિયઃ ॥ ૧૩૫ ॥

ઢં ઢં ઢં ઢૌં ઢ ઢં ઢ કૃત્યેત્થાહેતિ વાસિની ।
તારકબ્રહ્મમન્ત્રસ્થઃ શ્રીપાદપદ્મભાવકઃ ॥ ૧૩૬ ॥

તારિણ્યાદિમહામન્ત્ર સિદ્ધિસર્વાર્થસિદ્ધિદા ।
તન્ત્રમન્ત્રમહાયન્ત્ર વેદયોગસુસારવિત્ ॥ ૧૩૭ ॥

તાલવેતાલદૈતાલશ્રીતાલાદિસુસિદ્ધદા ।
તરુકલ્પલતાપુષ્પકલબીજપ્રકાશકઃ ॥ ૧૩૮ ॥

ડિન્તિડીતાલહિન્તાલતુલસીકુલવૃક્ષજા ।
અકારકૂટવિન્દ્વિન્દુમાલામણ્ડિતવિગ્રહઃ ॥ ૧૩૯ ॥

સ્થાતૃપ્રસ્થપ્રથાગાથાસ્થૂલસ્થિત્યન્તસંહરા ।
દરીકુઞ્જહેમમાલાવનમાલાદિભૂષિતઃ ॥ ૧૪૦ ॥

દારિદ્ર્યદુઃખદહનકાલાનલશતોપમઃ ।
દશસાહસ્રવક્ત્રામ્ભોરુહશોભિતવિગ્રહઃ ॥ ૧૪૧ ॥

પાશાભયવરાહ્લાદધનધર્માદિવર્ધિની ।
ધર્મકોટિશતોલ્લાસસિદ્ધિઋદ્ધિસમૃદ્ધિદા ॥ ૧૪૨ ॥

ધ્યાનયોગજ્ઞાનયોગમન્ત્રયોગફલપ્રદા ।
નામકોટિશતાનન્તસુકીર્તિગુણમોહનઃ ॥ ૧૪૩ ॥

નિમિત્તફલસદ્ભાવભાવાભાવવિવર્જિતા ।
પરમાનન્દપદવી દાનલોલપદામ્બુજઃ ॥ ૧૪૪ ॥

પ્રતિષ્ઠાસુનિવૃત્તાદિ સમાધિફલસાધિની ।
ફેરવીગણસન્માનવસુસિદ્ધિપ્રદાયકઃ ॥ ૧૪૫ ॥

ફેત્કારીકુલતન્ત્રાદિ ફલસિદ્ધિસ્વરૂપિણી ।
વરાઙ્ગનાકોટિકોટિકરામ્ભોજનિસેવિતા ॥ ૧૪૬ ॥

વરદાનજ્ઞાનદાન મોક્ષદાતિચઞ્ચલા ।

ભૈરવાનન્દનાથાખ્ય શતકોટિમુદાન્વિતઃ ॥ ૧૪૭ ॥

ભાવસિદ્ધિક્રિયાસિદ્ધિ સાષ્ટાઙ્ગસિદ્ધિદાયિની ।
મકારપઞ્ચકાહ્લાદમહામોદશરીરધૃક્ ॥ ૧૪૮ ॥

મદિરાદિપઞ્ચતત્ત્વનિર્વાણજ્ઞાનદાયિની ।
યજમાનક્રિયાયોગવિભાગફલદાયકઃ ॥ ૧૪૯ ॥

યશઃ સહસ્રકોટિસ્થ ગુણગાયનતત્પરા ।
રણમધ્યસ્થકાલાગ્નિ ક્રોધધારસુવિગ્રહઃ ॥ ૧૫૦ ॥

કાકિનીશાકિનીશક્તિયોગાદિ કાકિનીકલા ।
લક્ષણાયુતકોટીન્દુલલાટતિલકાન્વિતઃ ॥ ૧૫૧ ॥

લાક્ષાબન્ધૂકસિન્દૂરવર્ણલાવણ્યલાલિતા ।
વાતાયુતસહસ્રાઙ્ગઘૂર્ણાયમાનભૂધરઃ ॥ ૧૫૨ ॥

વિવસ્વત્પ્રેમભક્તિસ્થ ચરણદ્વન્દ્વનિર્મલા ।
શ્રીસીતાપતિશુદ્ધાઙ્ગ વ્યાપ્તેન્દ્રનીલસન્નિભઃ ॥ ૧૫૩ ॥

શીતનીલાશતાનન્દસાગરપ્રેમભક્તિદા ।
ષટ્પઙ્કેરુહદેવાદિસ્વપ્રકાશપ્રબોધિની ॥ ૧૫૪ ॥

મહોર્મીસ્થષડાધારપ્રસન્નહૃદયામ્બુજા ।
શ્યામપ્રેમકલાબન્ધસર્વાઙ્ગકુલનાયકઃ ॥ ૧૫૫ ॥

સંસારસારશાસ્ત્રાદિ સમ્બન્ધસુન્દરાશ્રયા ।
હ્સૌઃ પ્રેતમહાબીજમાલાચિત્રિતકણ્ઠધૃક્ ॥ ૧૫૬ ॥

હકારવામકર્ણાઢ્ય ચન્દ્રબિન્દુવિભૂષિતા ।
લયસૃષ્ટિસ્થિતિક્ષેત્રપાનપાલકનામધૃક્ ॥ ૧૫૭ ॥

લક્ષ્મીલક્ષજપાનન્દસિદ્ધિસિદ્ધાન્તવર્ણિની ।
ક્ષુન્નિવૃત્તિક્ષપારક્ષા ક્ષુધાક્ષોભનિવારકઃ ॥ ૧૫૮ ॥

ક્ષત્રિયાદિકુરુક્ષેત્રારુણાક્ષિપ્તત્રિલોચના ।
અનન્ત ઇતિહાસસ્થ આજ્ઞાગામી ચ ઈશ્વરી ॥ ૧૫૯ ॥

ઉમેશ ઉટકન્યેશી ઋદ્ધિસ્થહસ્થગોમુખી ।
ગકારેશ્વરસંયુક્ત ત્રિકુણ્ડદેવતારિણી ॥ ૧૬૦ ॥

ઐણાચીશપ્રિયાનન્દ ઐરાવતકુલેશ્વરી ।
ઓઢ્રપુષ્પાનન્તદીપ્ત ઓઢ્રપુષ્પાનખાગ્રકા ॥ ૧૬૧ ॥

એહત્યશતકોટિસ્થ ઔ દીર્ઘપ્રણવાશ્રયા ।

અઙ્ગસ્થાઙ્ગદેવસ્થા અર્ધસ્થશ્ચાર્ધમેશ્વરી ॥ ૧૬૨ ॥

માતૃકાવર્ણનિલયઃ સર્વમાતૃકલાન્વિતા ।
માતૃકામન્ત્રજાલસ્થઃ પ્રસન્નગુણદાયિની ॥ ૧૬૩ ॥

અત્યુત્કટપથિપ્રજ્ઞા ગુણમાતૃપદે સ્થિતા ।
સ્થાવરાનન્દદેવેશો વિસર્ગાન્તરગામિની ॥ ૧૬૪ ॥

અકલઙ્કો નિષ્કલઙ્કો નિરાધારો નિરાશ્રયા ।
નિરાશ્રયો નિરાધારો નિર્બીજો બીજયોગિની ॥ ૧૬૫ ॥

નિઃશઙ્કો નિસ્પૃહાનન્દો સિન્ધૂરત્નાવલિપ્રભા ।
આકાશસ્થઃ ખેચરી ચ સ્વર્ગદાતા શિવેશ્વરી ॥ ૧૬૬ ॥

સૂક્ષ્માતિસૂક્ષ્માત્વૈર્જ્ઞેયા દારાપદુઃખહારિણી ।
નાનાદેશસમુદ્ભૂતો નાનાલઙ્કારલઙ્કૃતા ॥ ૧૬૭ ॥

નવીનાખ્યો નૂતનસ્થ નયનાબ્જનિવાસિની ।
વિષયાખ્યવિષાનન્દા વિષયાશી વિષાપહા ॥ ૧૬૮ ॥

વિષયાતીતભાવસ્થો વિષયાનન્દઘાતિની ।
વિષયચ્છેદનાસ્ત્રસ્થો વિષયજ્ઞાનનાશિની ॥ ૧૬૯ ॥

સંસારછેદકચ્છાયો ભવચ્છાયો ભવાન્તકા ।
સંસારાર્થપ્રવર્તશ્ચ સંસારપરિવર્તિકા ॥ ૧૭૦ ॥

સંસારમોહહન્તા ચ સંસારાર્ણવતારિણી ।
સંસારઘટકશ્રીદાસંસારધ્વાન્તમોહિની ॥ ૧૭૧ ॥

પઞ્ચતત્ત્વસ્વરૂપશ્ચ પઞ્ચતત્ત્વપ્રબોધિની ।
પાર્થિવઃ પૃથિવીશાની પૃથુપૂજ્યઃ પુરાતની ॥ ૧૭૨ ॥

વરુણેશો વારુણા ચ વારિદેશો જલોદ્યમા ।
મરુસ્થો જીવનસ્થા ચ જલભુઞ્જલવાહના ॥ ૧૭૩ ॥

તેજઃ કાન્તઃ પ્રોજ્જ્વલસ્થા તેજોરાશેસ્તુ તેજસી ।
તેજસ્થસ્તેજસો માલા તેજઃ કીર્તિઃ સ્વરશ્મિગા ॥ ૧૭૪ ॥

પવનેશશ્ચાનિલસ્થા પરમાત્મા નિનાન્તરા ।
વાયુપૂરકકારી ચ વાયુકુમ્ભકવર્ધિની ॥ ૧૭૫ ॥

વાયુચ્છિદ્રકરો વાતા વાયુનિર્ગમમુદ્રિકા ।
કુમ્ભકસ્થો રેચકસ્થા પૂરકસ્થાતિપૂરિણી ॥ ૧૭૬ ॥

વાય્વાકાશાધારરૂપી વાયુસઞ્ચારકારિણી ।

વાયુસિદ્ધિકરો દાત્રી વાયુયોગી ચ વાયુગા ॥ ૧૭૭ ॥

આકાશપ્રકરો બ્રાહ્મી આકાશાન્તર્ગતદ્રિગા ।
આકાશકુમ્ભકાનન્દો ગગનાહ્લાદવર્ધિની ॥ ૧૭૮ ॥

ગગનાચ્છન્નદેહસ્થો ગગનાભેદકારિણી ।
ગગનાદિમહાસિદ્ધો ગગનગ્રન્થિભેદિની ॥ ૧૭૯ ॥

કલકર્મા મહાકાલી કાલયોગી ચ કાલિકા ।
કાલછત્રઃ કાલહત્યા કાલદેવો હિ કાલિકા ॥ ૧૮૦ ॥

કાલબ્રહ્મસ્વરૂપશ્ચ કાલિતત્ત્વાર્થરક્ષિણી ।
દિગમ્બરો દિક્પતિસ્થા દિગાત્મા દિગિભાસ્વરા ॥ ૧૮૧ ॥

દિક્પાલસ્થો દિક્પ્રસન્ના દિગ્વલો દિક્કુલેશ્વરી ।
દિગઘોરો દિગ્વસના દિગ્વીરા દિક્પતીશ્વરી ॥ ૧૮૨ ॥

આત્માર્થો વ્યાપિતત્ત્વજ્ઞ આત્મજ્ઞાની ચ સાત્મિકા ।
આત્મીયશ્ચાત્મબીજસ્થા ચાન્તરાત્માત્મમોહિની ॥ ૧૮૩ ॥

આત્મસઞ્જ્ઞાનકારી ચ આત્માનન્દસ્વરૂપિણી ।
આત્મયજ્ઞો મહાત્મજ્ઞા મહાત્માત્મપ્રકાશિની ॥ ૧૮૪ ॥

આત્મવિકારહન્તા ચ વિદ્યાત્મીયાદિદેવતા ।
મનોયોગકરો દુર્ગા મનઃ પ્રત્યક્ષ ઈશ્વરી ॥ ૧૮૫ ॥

મનોભવનિહન્તા ચ મનોભવવિવર્ધિની ।
મનશ્ચાન્તરીક્ષયોગો નિરાકારગુણોદયા ॥ ૧૮૬ ॥

મનોનિરાકારયોગી મનોયોગેન્દ્રસાક્ષિણી ।
મનઃપ્રતિષ્ઠો મનસા માનશઙ્કા મનોગતિઃ ॥ ૧૮૭ ॥

નવદ્રવ્યનિગૂઢાર્થો નરેન્દ્રવિનિવારિણી ।
નવીનગુણકર્માદિસાકારઃ ખગગામિની ॥ ૧૮૮ ॥

અત્યુન્મત્તા મહાવાણી વાયવીશો મહાનિલા ।
સર્વપાપાપહન્તા ચ સર્વવ્યાધિનિવારિણી ॥ ૧૮૯ ॥

દ્વારદેવીશ્વરી પ્રીતિઃ પ્રલયાગ્નિઃ કરાલિની ।
ભૂષણ્ડગણતાતશ્ચ ભૂઃષણ્ડરુધિરપ્રદા ॥ ૧૯૦ ॥

કાકાવલીશઃ સર્વેશી કાકપુચ્છધરો જયા ।
અજિતેશો જિતાનન્દા વીરભદ્રઃ પ્રભાવતી ॥ ૧૯૧ ॥

અન્તર્નાડીગતપ્રાણો વૈશેષિકગુણોદયા ।

રત્નનિર્મિતપીઠસ્થઃ સિંહસ્થા રથગામિની ॥ ૧૯૨ ॥

કુલકોટીશ્વરાચાર્યો વાસુદેવનિષેવિતા ।
આધારવિરહજ્ઞાની સર્વાધારસ્વરૂપિણી ॥ ૧૯૩ ॥

સર્વજ્ઞઃ સર્વવિજ્ઞાના માર્તણ્ડો યશ ઇલ્વલા ।
ઇન્દ્રેશો વિન્ધ્યશૈલેશી વારણેશઃ પ્રકાશિની ॥ ૧૯૪ ॥

અનન્તભુજરાજેન્દ્રો અનન્તાક્ષરનાશિની ।
આશીર્વાદસ્તુ વરદોઽનુગ્રહોઽનુગ્રહક્રિયા ॥ ૧૯૫ ॥

પ્રેતાસનસમાસીનો મેરુકુઞ્જનિવાસિની ।
મણિમન્દિરમધ્યસ્થો મણિપીઠનિવાસિની ॥ ૧૯૬ ॥

સર્વપ્રહરણઃ પ્રેતો વિધિવિદ્યાપ્રકાશિની ।
પ્રચણ્ડનયનાનન્દો મઞ્જીરકલરઞ્જિની ॥ ૧૯૭ ॥

કલમઞ્જીરપાદાબ્જો બલમૃત્યુપરાયણા ।
કુલમાલાવ્યાપિતાઙ્ગઃ કુલેન્દ્રઃ કુલપણ્ડિતા ॥ ૧૯૮ ॥

બાલિકેશો રુદ્રચણ્ડા બાલેન્દ્રાઃ પ્રાણબાલિકા ।
કુમારીશઃ કામમાતા મન્દિરેશઃ સ્વમન્દિરા ॥ ૧૯૯ ॥

અકાલજનનીનાથો વિદગ્ધાત્મા પ્રિયઙ્કરી ।
વેદાદ્યો વેદજનની વૈરાગ્યસ્થો વિરાગદા ॥ ૨૦૦ ॥

સ્મિતહાસ્યાસ્યકમલઃ સ્મિતહાસ્યવિમોહિની ।
દન્તુરેશો દન્તુરુ ચ દન્તીશો દર્શનપ્રભા ॥ ૨૦૧ ॥

દિગ્દન્તો હિ દિગ્દશના ભ્રષ્ટભુક્ ચર્વણપ્રિયા ।
માંસપ્રધાના ભોક્તા ચ પ્રધાનમાંસભક્ષિણી ॥ ૨૦૨ ॥

મત્સ્યમાંસમહામુદ્રા રજોરુધિરભુક્પ્રિયા ।
સુરામાંસમહામીનમુદ્રામૈથુનસુપ્રિયા ॥ ૨૦૩ ॥

કુલદ્રવ્યપ્રિયાનન્દો મદ્યાદિકુલસિદ્ધિદા ।
હૃત્કણ્ઠભ્રૂસહસ્રારભેદનોઽન્તે વિભેદિની ॥ ૨૦૪ ॥

પ્રસન્નહૃદયામ્ભોજઃ પ્રસન્નહૃદયામ્બુજા ।
પ્રસન્નવરદાનાઢ્યઃ પ્રસન્નવરદાયિની ॥ ૨૦૫ ॥

પ્રેમભક્તિપ્રકાશાઢ્યઃ પ્રેમાનન્દપ્રકાશિની ॥ ૨૦૬ ॥

પ્રભાકરફલોદયઃ પરમસૂક્ષ્મપુરપ્રિયા ।
પ્રભાતરવિરશ્મિગઃ પ્રથમભાનુશોભાન્વિતા ।

પ્રચણ્ડરિપુમન્મથઃ પ્રચલિતેન્દુદેહોદ્ધતઃ ।
પ્રભાપટલપાટલપ્રચયધર્મપુઞ્જાચીતા ॥ ૨૦૭ ॥

સુરેન્દ્રગણપૂજિતઃ સુરવરેશસમ્પૂજિતા ।
સુરેન્દ્રકુલ સેવિતો નરપતીન્દ્રસંસેવિતા ।
ગણેન્દ્ર ગણનાયકો ગણપતીન્દ્ર દેવાત્મજા ।
ભવાર્ણવર્ગતારકો જલધિકર્ણધારપ્રિયા ॥ ૨૦૮ ॥

સુરાસુરકુલોદ્ભવઃ સુરરિપુપ્રસિદ્ધિસ્થિતા
સુરારિગણઘાતકઃ સુરગણેન્દ્રસંસિદ્ધિદા ।
અભીપ્સિતફલપ્રદઃ સુરવરાદિસિદ્ધિપ્રદા
પ્રિયાઙ્ગજ કુલાર્થદઃ સુતધનાપવર્ગપ્રદા ॥ ૨૦૯ ॥

શિવસ્વશિવકાકિની હરહરા ચ ભીમસ્વના
ક્ષિતીશ ઇષુરક્ષકા સમનદર્પહન્તોદયા ।
ગુણેશ્વર ઉમાપતી હૃદયપદ્મભેદી ગતિઃ
ક્ષપાકરલલાટધૃક્ સ્વસુખમાર્ગસન્દાયિની ॥ ૨૧૦ ॥

શ્મશાનતટનિષ્પટ પ્રચટહાસકાલઙ્કૃતા
હઠત્શઠમનસ્તટે સુરકપાટસંછેદકઃ ।
સ્મરાનનવિવર્ધનઃ પ્રિયવસન્તસમ્બાયવી
વિરાજિતમુખામ્બુજઃ કમલમઞ્ચસિંહાસના ॥ ૨૧૧ ॥

ભવો ભવપતિપ્રભાભવઃ કવિશ્ચ ભાવ્યાસુરૈઃ
ક્રિયેશ્વર ઈલાવતી તરુણગાહિતારાવતી ।
મુનીન્દ્રમનુસિદ્ધિદઃ સુરમુનીન્દ્રસિદ્ધાયુષી
મુરારિહરદેહગસ્ત્રિભુવના વિનાશક્રિયા ॥ ૨૧૨ ॥

દ્વિકઃ કનકકાકિની કનકતુઙ્ગકીલાલકઃ
કમલાકુલઃ કુલકલાર્કમાલામલા ।
સુભક્ત તમસાધકપ્રકૃતિયોગયોગ્યાર્ચિતો
વિવેકગતમાનસઃ પ્રભુપરાદિહસ્તાચીતા ॥ ૨૧૩ ॥

ત્વમેવ કુલનાયકઃ પ્રલયયોગવિદ્યેશ્વરી
પ્રચણ્ડગણગો નગાભુવનદર્પહારી હરા ।
ચરાચરસહસ્રગઃ સકલરૂપમધ્યસ્થિતઃ
સ્વનામગુણપૂરકઃ સ્વગુણનામસમ્પૂરણી ॥ ૨૧૪ ॥

ઇતિ તે કથિતં નાથ સહસ્રનામ મઙ્ગલમ્ ।
અત્યદ્ભુતં પરાનન્દરસસિદ્ધાન્તદાયકમ્ ॥ ૨૧૫ ॥

માતૃકામન્ત્રઘટિતં સર્વસિદ્ધાન્તસાગરમ્ ।
સિદ્ધવિદ્યામહોલ્લાસ માનન્દગુણસાધનમ્ ॥ ૨૧૬ ॥

દુર્લભં સર્વલોકેષુ યામલે તત્પ્રકાશિતમ્ ।
તવ સ્નેહરસામોદમોહિતાનન્દભૈરવ ॥ ૨૧૭ ॥

કુત્રાપિ નાપિ કથિતં સ્વસિદ્ધ હાનિશઙ્કયા ।
સર્વાદિયોગ સિદ્ધાન્તસિદ્ધયે ભુક્તિમુક્તયે ॥ ૨૧૮ ॥

પ્રેમાહ્લાદરસેનૈવ દુર્લભં તત્પ્રકાશિતમ્ ।
યેન વિજ્ઞાતમાત્રેણ ભવેદ્દ્છીભૈરવેશ્વરઃ ॥ ૨૧૯ ॥

એતન્નામ શુભફલં વક્તું ન ચ સમર્થકઃ ।
કોટિવર્ષશતૈનાપિ યત્ફલં લભતે નરઃ ॥ ૨૨૦ ॥

તત્ફલં યોગિનામેક ક્ષણાલ્લભ્યં ભવાર્ણવે ।
યઃ પઠેત્ પ્રાતરુત્થાય દુર્ગગ્રહનિવરણાત્ ॥ ૨૨૧ ॥

દુષ્ટેન્દ્રિયભયેનાપિ મહાભયનિવારણાત્ ।
ધ્યાત્વા નામ જપેન્નિત્યં મધ્યાહ્ને ચ વિશેષતઃ ॥ ૨૨૨ ॥

સન્ધ્યાયાં રાત્રિયોગે ચ સાધયેન્નામસાધનમ્ ।
યોગાભ્યાસે ગ્રન્થિભેદે યોગધ્યાનનિરૂપણે ॥ ૨૨૩ ॥

પઠનાદ્ યોગસિદ્ધિઃ સ્યાદ્ ગ્રન્થિભેદો દિને દિને ।
યોગજ્ઞાનપ્રસિદ્ધિઃ સ્યાદ્ યોગઃ સ્યાદેકચિત્તતઃ ॥ ૨૨૪ ॥

દેહસ્થ દેવવશ્યાય મહામોહપ્રશાન્તયે ।
સ્તમ્ભનાયારિસૈન્યાનાં પ્રત્યહં પ્રપઠેચ્છુચિઃ ॥ ૨૨૫ ॥

ભક્તિભાવેન પાઠેન સર્વકર્મસુ સુક્ષમઃ ।
સ્તમ્ભયેત્ પરસૈન્યાનિ વારૈકપાઠમાત્રતઃ ॥ ૨૨૬ ॥

વારત્રયપ્રપઠનાદ્ વશયેદ્ ભુવનત્રયમ્ ।
વારત્રયં તુ પ્રપઠેદ્ યો મૂર્ખઃ પણ્ડિતોઽપિ વા ॥ ૨૨૭ ॥

શાન્તિમાપ્નોતિ પરમાં વિદ્યાં ભુવનમોહિનીમ્ ।
પ્રતિષ્ઠાઞ્ચ તતઃ પ્રાપ્ય મોક્ષનિર્વાણમાપ્નુયાત્ ॥ ૨૨૮ ॥

વિનાશયેદરીઞ્છીઘ્રં ચતુર્વારપ્રપાઠને ।
પઞ્ચાવૃત્તિપ્રપાઠેન શત્રુમુચ્ચાટયેત્ ક્ષણાત્ ॥ ૨૨૯ ॥

ષડાવૃત્યા સાધકેન્દ્રઃ શત્રૂણાં નાશકો ભવેત્ ।
આકર્ષયેત્ પરદ્રવ્યં સપ્તવારં પઠેદ્ યદિ ॥ ૨૩૦ ॥

એવં ક્રમગતં ધ્યાત્વા યઃ પઠેદતિભક્તિતઃ ।
સ ભવેદ્ યોગિનીનાથો મહાકલ્પદ્રુમોપમઃ ॥ ૨૩૧ ॥

ગ્રન્થિભેદસમર્થઃ સ્યાન્માસમાત્રં પઠેદ્ યદિ ।
દૂરદર્શી મહાવીરો બલવાન્ પણ્ડિતેશ્વરઃ ॥ ૨૩૨ ॥

મહાજ્ઞાની લોકનાથો ભવત્યેવ ન સંશયઃ ।
માસૈકેન સમર્થઃ સ્યાન્નિર્વાણમોક્ષસિદ્ધિભાક્ ॥ ૨૩૩ ॥

પ્રપઠેદ્ યોગસિદ્ધ્યર્થં ભાવકઃ પરમપ્રિયઃ ।
શૂન્યાગારે ભૂમિગર્તમણ્ડપે શૂન્યદેશકે ॥ ૨૩૪ ॥

ગઙ્ગાગર્ભે મહારણ્યે ચૈકાન્તે નિર્જનેઽપિ વા ।
દુર્ભિક્ષવર્જિતે દેશે સર્વોપદ્રવવર્જિતે ॥ ૨૩૫ ॥

શ્મશાને પ્રાન્તરેઽશ્વત્થમૂલે વટતરુસ્થલે ।
ઇષ્ટકામયગેહે વા યત્ર લોકો ન વર્તતે ॥ ૨૩૬ ॥

તત્ર તત્રાનન્દરૂપી મહાપીઠસ્થલેઽપિ ચ ।
દૃઢાસનસ્થઃ પ્રજપેન્નામમઙ્ગલમુત્તમમ્ ॥ ૨૩૭ ॥

ધ્યાનધારણશુદ્ધાઙ્ગો ન્યાસપૂજાપરાયણઃ ।
ધ્યાત્વા સ્તૌતિ પ્રભાતે ચ મૃત્યુજેતા ભવેદ્ ધ્રુવમ્ ॥ ૨૩૮ ॥

અષ્ટાઙ્ગસિદ્ધિમાપ્નોતિ ચામરત્વમવાપ્નુયાત્ ।
ગુરુદેવમહામન્ત્રભક્તો ભવતિ નિશ્ચિતમ્ ॥ ૨૩૯ ॥

શરીરે તસ્ય દુઃખાનિ ન ભવન્તિ કુવૃદ્ધયઃ ।
દુષ્ટગ્રહાઃ પલાયન્તે તં દૃષ્ટ્વા યોગિનં પરમ્ ॥ ૨૪૦ ॥

યઃ પઠેત્ સતતં મન્ત્રી તસ્ય હસ્તેઽષ્ટસિદ્ધયઃ ।
તસ્ય હૃત્પદ્મલિઙ્ગસ્થા દેવાઃ સિદ્ધ્યન્તિ ચાપરાઃ ॥ ૨૪૧ ॥

યુગકોટિસહસ્રાણિ ચિરાયુર્યોગિરાડ્ ભવેત્ ।
શુદ્ધશીલો નિરાકારો બ્રહ્મા વિષ્ણુઃ શિવઃ સ ચ ।
સ નિત્યઃ કાર્યસિદ્ધશ્ચ સ જીવન્મુક્તિમાપ્નુયાત્ ॥ ૨૪૨ ॥

॥ ઇતિ શ્રીરુદ્રયામલે ઉત્તરતન્ત્રે મહાતન્ત્રોદ્દીપને
ઈશ્વરશક્તિકાકિન્યષ્ટોત્તર સહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

.. kAkinyaShTottarasahasranAmastotra ..
was typeset on August 2, 2016

Please send corrections to sanskrit@cheerful.com